8 काकस्य चातुर्यम्

एकस्मिन् वने एकः वटवृक्षः अस्ति। तत्र काकः वसति। काकस्य पत्नी शावकैः सह तत्रैव वसति। तस्य वृक्षस्य अधः कोटरे एकः सर्पः वसति।



एकदा काकः भार्यया सह आहारार्थं गच्छति। तदा सर्पः एकं शावकं खादति।



काकः आगच्छति पश्यति च। एकः शावकः नीडे नास्ति। वृक्षस्य अधः सर्पं दृष्ट्वा काकः वदति 'अहो, एषः दुष्टसर्पः शावकं खादति।' कश्चित् उपायं करोमि। इति विचिन्त्य काकः नदीं प्रति गच्छति।



तत्र राजकुमारी स्नानं करोति। तस्याः सुवर्णहारः नदीतीरे अस्ति। चतुरः काकः सुवर्णहारम् अपहरति।





काकः सुवर्णहारं कोटरस्य अन्तः क्षिपति। सैनिकः काकस्य पृष्ठे आगच्छति। कोटरे सुवर्णहारः सर्पं च पश्यति। सः चिन्तयति 'अहो प्रथमं सर्पं मारयामि अनन्तरं हारं नयामि।'

सैनिकः सर्पं मारयति हारं नयति ।
काकः वदति 'अहो, सर्पः मृतः। अधुना सुखेन वसामि ।'



टिप्पणी

अधः નીચે **कोटरे** બખોલમાં **एकस्मिन्** કોઈ એક **शावकैः सह** બચ્ચાં સાથે **तत्रैव** ત્યાં જ **आहारार्थम्** આહાર માટે **पृष्ठे** પાછળ **अनन्तरम्** પછીથી **नयामि** લઈ જઉં છું **अधुना** અત્યારે **नीडे** માળામાં **कश्चित्** કોઈક **विचिन्त्य** વિચારીને **अपहरति** ઉપાડી જાય છે.

स्वाध्यायः

I5S2P7

1. નીચેના શબ્દોનું શુદ્ધ ઉચ્ચારણ કરો :

शावकैः दुष्टसर्पः विचिन्त्य सुवर्णहारम् चिन्तयति ।

2. ઉદાહરણમાં દર્શાવ્યા મુજબ નીચેનાં વાક્યો પૂર્ણ કરો :

ઉદાહરણ : सर्पः _____ वसति। (कोटरम्)

सर्पः कोटरे वसति।

(1) सिंहः _____ वसति। (वनम्)

(2) मनुष्यः _____ वसति। (नगरम्)

(3) खगः _____ वसति। (नीडः)

(4) वानरः _____ वसति। (वृक्षः)

(5) मत्स्यः _____ वसति। (जलम्)

3. ઉદાહરણમાં દર્શાવ્યા મુજબ લખો :

ઉદાહરણ : काकः नदीं प्रति गच्छति।

(1) छात्रः _____ प्रति गच्छति। (शाला)

(2) कृषिकः _____ प्रति गच्छति। (क्षेत्र)

(3) व्याघ्रः _____ प्रति गच्छति। (वन)

(4) हंसः _____ प्रति गच्छति। (सरोवर)

4. નીચેનાં વાક્યો સુવાચ્ય અક્ષરે લખો :

(1) एकस्मिन् वने एकः वटवृक्षः अस्ति। _____

(2) एकः दुष्टः सर्पः शावकं खादति। _____

(3) तस्याः सुवर्णहारः नदीतीरे अस्ति। _____

(4) सैनिकः काकस्य पृष्ठे आगच्छति। _____

(5) सैनिकः सर्पं मारयति। _____

5. તમારા શિક્ષક પાઠમાંથી જે શબ્દો બોલે તે શબ્દો અહીં લખો :

(1)	
(2)	
(3)	
(4)	
(5)	